**दिनाङ्क :- 23/06/24** **सायम् - 06:20**

**इयम् आकाशवाणी**

**आदौ-मुख्यवार्ता:**

- अष्टादश-लोकसभायाः प्रथमं सत्रं श्वः समारपस्यते। अस्मिन् सत्रे, नवनिर्वाचितानां संसद्-सदस्यानां शपथ-ग्रहणं भविष्यति।
- परीक्षापरिणामविषये उत्थापितानां विवादानां कारणात् एन.टी.ए. इत्यस्य महानिदेशकः सुबोधकुमारसिंहः पदात् निष्कासितः।
- NEET UG राष्ट्रीय - पात्रता- सह- प्रवेश- परीक्षा सूच्यां कृपांकम् प्राप्तानां त्रिषष्ट्युत्तर - पञ्चशताधिक एकसहस्रछात्राणां पुनः परीक्षा अद्य संजाता।
- गृहमन्त्री अमितशाहः देशे जलौघप्रबन्धनस्य समग्र- सज्जतायाः समीक्षां करोति।
- विदेशमंत्री डॉक्टर सुब्रह्मण्यम-जयशंकरः अद्य संयुक्त-अरब-अमीरात-देशस्य आधिकारिक-यात्रायां प्राप्तवान्।
- अद्य आई.सी.सी. विंशति- विंशतिः विश्वचषकक्रिकेट् इति क्रीडाशृङ्खलायाम् उत्कृष्ट-अष्ट-चक्रे अफगानिस्तानदेशः आस्ट्रेलियादेशं एकविंशति- धावनांकैः पराजित्य समग्रक्रीडा-अनुमानं परिवर्तितवान्।
- \-

**अथ वार्ता: विस्तरेण**

**संसद्-सत्रं**

अष्टादश-लोकसभायाः प्रथमं सत्रं श्वः समारप्स्यते। अस्मिन् सत्रे, नवनिर्वाचितानां संसद्-सदस्यानां शपथ-ग्रहणं भविष्यति। भाजपेति दलस्य वरिष्ठ: सांसद: भर्तृहरि महताबः, यो नवलोकसभाया: प्रोटेम स्पीकर अर्थात् अस्थाई अध्यक्ष रूपेण कार्यं करिष्यति, स: नवनिर्वाचितानां संसद्-सदस्यानां शपथ-ग्रहणं कारयिष्यति। नूतन-लोकसभा-अध्यक्षस्य निर्वाचनं अस्मिन् मासस्य षट्-विंशति दिनांके भविष्यति एवं राष्ट्रपति-पदासीना द्रौपदी-मुर्मू: सप्त-विंशति-दिनांके संसदि लोकसभाया: राज्यसभायाश्च संयुक्त-सत्रं संबोधयिष्यति।

अस्मिन् मासस्य सप्त-विंशति-दिनांके राज्यसभायाः सत्रं समारप्स्यते। संसदः सत्रमिदम् अग्रिम-मासस्य त्रिणि-दिनांके समाप्तं भविष्यति । अयं कार्यक्रमः अस्माकं अन्तर्-जाल-पटले NEWS ON AIR DOT COM अथ अस्माकं YouTube पटलस्य प्रवाहिकायां NEWS ON AIR OFFICIAL इत्यत्र अपि उपलब्धो भविष्यति।

-

**नीट-पुनर्परीक्षा**

परीक्षापरिणामविषये उत्थापितानां विवादानां कारणात् एन.टी.ए. राष्ट्रियपरीक्षा-अभिकरणस्य महानिदेशकः सुबोधकुमारसिंहः पदात् निष्कासितः । भारतीय -व्यापार- प्रवर्धन- संघटनस्य अध्यक्षः एवं प्रबन्धननिदेशक: प्रदीपसिंह खरोला अस्मै महानिदेशकस्य अतिरिक्तप्रभारः प्रदत्तः।

NEET UG राष्ट्रीय - पात्रता- सह- प्रवेश- परीक्षा चतुश्चत्वारिंशत्- अधिक- द्विसहस्र सूच्यां कृपांकम् प्राप्तानां त्रिषष्ट्युत्तर - पञ्चशताधिक एकसहस्रछात्राणां पुनः परीक्षा अद्य संजाता। राष्ट्रीयपरीक्षणअभिकरणेन- एन.टी.ए. इत्यनेन उक्तं यत् पुनः परीक्षा अपराह्णे द्वि वादनतः सायं विंशति- कलोत्तर- पञ्चवादनपर्यन्तमासीत्।

**नीट- सी.बी.आई.**

नीट इति नाम्ना स्नातकस्तरीयायां परीक्षायां कथित-प्रश्नपत्र-दुरुद्घाटन-प्रकरणे केन्द्रीय-अन्वेषण-ब्यूरो सीबीआई इत्यनेन प्राथमिकी पञ्जीकृतास्ति। सीबीआई इत्यस्य सूत्रानुसारं, एषा प्राथमिकी शिक्षा-मंत्रालयस्य अनुरोधेण पञ्जीकृता जाता। व्यापक-गवेषणायै वरतरा-दुर्गोष्ठ्याः पटाक्षेपाय च अन्वेषण-समवायेन आराष्ट्रे पञ्जीकृतान् प्रकरणान् स्व-अधिकार-क्षेत्रे आनेतुं कार्यं करोति। ह्यः शिक्षामंत्रालयेन ऐषमः वर्षस्य नीट-परीक्षायाः प्रकरणं केन्द्रीय-अन्वेषण-ब्यूरो इत्यमुं हस्तान्तरणान्तरं उक्तवान् यत् सर्वकारः परीक्षासु शुचितां सुनिश्चेतुं छात्र-हितान् रक्षयितुं प्रतिबद्धः अस्ति।

मन्त्रालयेन पुनरेकवारं समुदीरितं यत् ये के जनाः अस्मिन् प्रश्नपत्र-दुरुद्घाटन-प्रकरणे सन्लिप्ताः लप्स्यन्ते तेषां विरुद्धं कठोर-दण्डात्मकानि क्रियान्वयनानि भविष्यन्ति । राष्ट्रिय-परीक्षा-अभिकरणेन एन.टी.ए. इत्यनेन गतमासस्य पञ्च-दिनांके एषा परीक्षा आयोजिता आसीत्।

-

**विरामः**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

-

**गृहमन्त्री**

गृहमन्त्री अमितशाहः देशे जलौघप्रबन्धनस्य समग्र- सज्जतायाः समीक्षां कृतवान्। गृहमन्त्रिणः अमितशाहस्य अध्यक्षतायां अद्य नवदिल्लीनगरे देशे जलौघ -प्रबन्धनसज्जतायाः विषये उच्चस्तरीयसमीक्षोपवेशनं कृतम्। उपवेशने जल शक्ति मंत्री सी.आर. पाटिलः, गृहराज्यमन्त्री नित्यानन्दरायः तथा विभिन्न-मन्त्रालय-विभागसचिवाः भागं गृहीतवन्तः।

अधुना झारखण्ड, हिमाचलप्रदेश, सिक्किम इत्यादिषु विभिन्नेषु राज्येषु भूस्खलन-जलप्रलय-सम्बद्धाः बहव्यः घटनाः अभवन् । सम्प्रति असमदेशे जलौघस्य स्थितिः अस्ति। अनेकेषु मण्डलेषु लक्षाः जनाः प्रभाविताः अभवन् । गतमासे त्रिपुरे रेमाल-चक्रवातेन महती क्षतिः अभवत् ।

**विदेशमन्त्री**

विदेशमंत्री डॉक्टर सुब्रह्मण्यम-जयशंकरः अद्य संयुक्त-अरब-अमीरात-देशस्य आधिकारिक-यात्रायां प्राप्तवान्। अस्मिन् अवधौ सः संयुक्त-अरब-अमीरातस्य विदेश-मंत्रिणा सह वार्तां करिष्यति अपि च परस्पर-सहभागितायाः व्यापकेषु विषयेषु चर्चां विधास्यति विदेश मंत्रालयेन उक्तं यत् अनया यात्रया भारत-संयुक्त अमीरातयोः मध्ये सामरिक-सहभागितायाः समीक्षा अथ क्षेत्रीयाणां वैश्विकानाञ्च घटनाक्रमेषु विचार-विमर्शस्य अवसरं मिलिष्यति।

**क्रिकेट्**

अद्य आई.सी.सी. अन्ताराष्ट्रिय विंशति- विंशतिः विश्वचषकक्रिकेट् इति क्रीडाशृङ्खलायाम् उत्कृष्ट-अष्ट-चक्रे अफगानिस्तानदेशः आस्ट्रेलियादेशं एकविंशति- धावनांकैः पराजित्य समग्रक्रीडा-अनुमानं परिवर्तितवान्। जमैकादेशस्य किङ्ग्स्टन्-क्रीडाङ्गणे प्रथमं दण्डचालनं कृत्वा अफगानिस्तानदेशः विंशत्यां कन्दुक-प्रक्षेपण- चक्रेषु पञ्चसु क्रीडकेषु अष्टचत्वारिंशदधिक- एकशतम् धावनांकानि अर्जितवान् । तस्य प्रतिक्रियारूपेण आस्ट्रेलियादेशः केवलं चतुर् - ऊन - कन्दुके सप्तविंशति- अधिक- एकशतं धावनांकानि अर्जितवान् ।

अद्य अमेरिकादेशस्य इङ्ग्लैण्ड्-देशस्य च स्पर्धा भविष्यति।

**कोलकाता-एसटीएफ**

-
विशेष-कार्य-दल एस.टी.एफ. इत्यनेन अथ पश्चिम बंगाल आरक्षि दलेन ‘शहादत’ इति नाम्नः आतंकवादी-समूहः निगडितः।

'शहादत’ इति आतंकवादी-समूहः बांग्लादेशे सक्रिय: प्रतिबंधित-आतंकवादी-समूह: अंसार अल इस्लामस्य आनुषंगिक-संघटनं अस्ति। ध्यातव्य अस्ति, यत् अंसार-अल-इस्लामस्य संबंधः कुख्यात-अंताराष्ट्रिय-आतंकवादी-समूह अल- कायदा इत्यनेन साकं अस्ति। ‘शहादत’ आतंकवादी-समूहस्य प्रमुख: मुहम्मद हबीबुल्लाह: गतरात्रौ पश्चिम-बर्धमान जनपदस्य कांकसा-क्षेत्रात् निगडित: जात: । अस्य समूहस्य उग्रवादिनः भारते बांग्लादेशे च विभिन्नेषु उपद्रव-गतिविधिसु सक्रियाः सन्ति।

-

**बहुजन-समाज-पार्टी**

बहुजन-समाज-पार्टीति दलस्य अध्यक्षा मायावती अद्य चतुश्चत्वारिंशत्- उत्तर-द्विसहस्र - लोकसभायाः परिणामविषये समीक्षोपवेशनम् आयोजितवती। उत्तर प्रदेशस्य लखनऊस्थे दलीयकार्यालये आयोजिते अस्मिन् उपवेशने दलस्य समस्ताः राष्ट्र-स्तरीयाः पदाधिकारिणः सम्मिलिताः।

**पीएम – श्यामा प्रसाद**

प्रधानमन्त्री नरेन्द्र मोदी प्रख्यातस्य विचारकस्य एवं शिक्षाविद: डॉ श्यामा प्रसाद मुखर्जी तस्य वीरगति-दिवसस्यावसरे श्रद्धाञ्जलिं प्रदत्तवान्। जनसंचार माध्यमेन श्री मोदी उक्तवान् यत् डॉक्टर मुखर्जी स्वस्य जीवनं भारत-मातु: सेवायां समर्पितवान्।

**विश्व-टेबल**

भारतस्य श्रीजा अकुला विश्वटेबलटेनिस्- अभ्यर्थि- प्रतियोगितायाः एकल-अन्तिम-क्रीडायाः प्रथमा भारतीया अभवत् । अधुना श्रीजा, डिङ्ग यिजी च अद्य सायंकाले एकल-अन्तिम-क्रीडायां परस्परं सम्मुखीभवतः।

**।। इति वार्ता: ।।**